N.A.
Sutsanhitā
सूतसंहिता
Sanskrit (Devnagari)
Paper; Handwritten
N.A
Folio: 17
13.9"x 5.4"
Complete

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू॰हि॰ १

श्रीगणेशायनमः॥प्रणमामिपरंब्रह्मयतोव्यावृत्तवृत्तयः॥अविचारसहंवस्तुविषयीकुर्वतेधि
यः॥१॥श्रीमत्काशीविलासाख्यक्रियाशक्तीशसेविना॥श्रीमत्त्र्यम्बकपादाब्जसेवानिष्णातचेत
सा॥२॥वेदशास्त्रप्रतिष्ठात्राश्रीमन्माधवमंत्रिणा॥तात्पर्यदीपिकासूतसंहितायाविधीयते॥३॥
क्रियतेतत्तत्प्रकरणतात्पर्यप्रथनपूर्वकंविशदम्॥विषमपदवाक्यविवरणंमंदधियामनुग्रहा
यभक्त्याच॥४॥इहहिभगवान्बादरायणोलोकानुग्रहैकरसिकतयापरमशिवस्वरूपाविष्क
रणप्रधानांसंहितामारभमाणोमहतःपुरुषार्थस्यप्रसूहप्राचुर्यात्तन्निवृत्तयेशिष्टाचारानुमि
त श्रुतिबोधितकर्तव्यताकंपरशिवस्यप्रणिधानप्रणाममलक्षणंमंगलाचरणंस्वयंकृतंशि
ष्यशिक्षायैग्रंथादावुपनिबध्नाति॥ऐश्वरमिति श्लोकद्वयेन द्विविधंहिपारमेश्वरंरूपंनि
ष्कलंसकलंचेति॥तत्रनिष्कलंशुद्धंसकलंशंभुलिंगमूर्त्तिरूपंस्वप्रकाशाखंडसच्चिदानंदै

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

करसमद्वितीयंस्वप्रतिपत्तिफलं तत्प्रणिधानंप्रथमार्द्धेन निष्कलस्वरूपंबोधानंदमयंप्र
णिधेयत्वेनोक्तम्॥शिवागमे॥परैक्यप्रापकंज्ञानंवक्ष्मिसम्यक्हितायवः॥चिदानंदघ
नंपूर्णंप्रत्यक्ब्रह्मात्म नास्यितम्॥२॥जगन्मूलमकर्त्तारंबोधानंदमयंविभुम्॥ नि
ष्कलंस्वप्रकाशंचसंचिंत्यपरमंशिवमिति॥तत्रैव॥ हंतेःसाक्षितयाहंतिप्रागभावस्यच
स्थितः॥बुभुत्सायास्तथाज्ञोस्मीत्यभातात्ज्ञानवस्तुनः॥अप्रसत्यालंबनत्वेनसत्यःसर्वजड
स्यतु॥साधकत्वेनचिद्रूपःसदाप्रेमास्पदत्वतः॥आनंदरूपःसर्वार्थसाधकत्वेनहेतुना
॥सर्वसंबंधवत्वेनसंपूर्णःशिवसंज्ञितः॥जीवेशत्वादिरहितःकेवलःस्वप्रभःशिवः॥इतिशैवपु
राणेब्रुकूटस्थःप्रविवेचितः॥तदुक्तंमृगेंद्रसंहितायांशिवंप्रकृत्य॥जगज्जन्मस्थितिध्वंसतिरोभा
वैककारणम्॥भूतभौतिकभावानांनियमस्यैतदेवहीति॥तत्रैश्वरंरूपमपरमचलतनयाद्युपाधि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू॰हि॰ विशिष्टम्॥ परमं निरस्तसमस्तोपाधिकं स्वप्रतिष्ठमखण्डं सच्चिदानंदैकरसमद्वितीयं तत्तत्त्वं त्रैका
२ लिकबाधशून्यं मिथ्याभूतपरिकल्पितस्वरूपमायातत्कार्यसंस्पर्शविरहात्॥ ननु मायाकार्येण का
लेनावच्छेदादेव कथं तदसंस्पर्श इति तत्राह आदीति॥ स्वप्रागभावावच्छिन्नो भूतकाल आदिः॥
स्वप्रध्वंसावच्छिन्नकालो भविष्यदन्तः स्वावच्छिन्नो वर्तमानकालो मध्य एतत्त्रितयवर्जितम्
कलातत्त्वसहभावि हि कालतत्त्वम्॥ उक्तं हि॥ पुंसो जगत्कर्तृतार्थं मायातस्तत्त्वपंचकं भवति
कालो नियतिश्च तथा भूतयदृच्छा स्वभावश्च तथा च कलासहभावी काल एव नास्ति कुतो नि
ल ष्कलं परशिवस्य तत्कृतपरिच्छेदाशंकेत्यभिप्रायः॥ इत्थं निष्कलप्रणिधानं कृतं सकलमपि द्विवि
धम्॥ समस्तजगदात्मकं समस्तजगन्नियंतृ च समस्तजगदात्मकमुपादानत्वात्॥ जगन्नियंतृ
लीलावतारस्वरूपेण च नमस्कारः कृतः॥ तत्र जगदात्मना प्रणाममाह द्वितीयार्द्धेन॥ आधारमिति॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यथैव हि जगतां नियंतासत्वमायोपाधिवशात्तमोपाधिवशाज्जगदात्मकः॥ एवं रजोगुणोपाधिवशाज्जगदाधारोपि॥ उक्तं हि जगन्नियंतृत्वजगदात्मकत्वे परमेश्वरस्य॥ शिवो दाता शिवो भोक्ता शिवः सर्वमिदं जगदिति॥ स्थितिः संयमकर्त्ता च जगतोऽस्य जगच्च स इति। च श्रुतेश्च सोऽकामयत बहु स्यां प्रजायेयेति

ॐ सेश्वरं परमं तत्त्वमादिमध्यान्तवर्जितम्॥ आधारं सर्वलोकानामनाधारमविक्रियम्॥१॥

तेन हि सोऽकामयतेति निमित्तत्वं बहु स्यामित्युपादानत्वं॥ तथापारमर्षसूत्रमपि प्रकृतिश्च प्रतिज्ञादृष्टांतानुपरोधादिति॥ यथैव सर्वलोकानामयमाधारः॥ एवमस्यापि कश्चिदन्य आधार इति भ्रमं व्युदस्यति अनाधारमिति॥ स्वातिरिक्ताधाररहितः स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नीति स्वमहिमप्रतिष्ठत्व श्रुतेः॥ ननु जगत आधारश्चेदाधेयजगदात्मना धर्मैरुपायापायवत्ताविकारित्वं तस्य स्यात्॥ उपयन्नपयन्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स॰ हि॰ धर्मो विकरोतीति हि धर्मिणमिति न्यायादिति ॥ तत्राह अविक्रियमिति ॥ कल्पितत्वेन जगतो न स्वाश्रयविका
२ रहेतुता ॥ न हि मरुमरीचिकाजलेन मरुभूमिरार्द्रीक्रियत इत्यर्थः ॥१॥ इदानीं जगन्नियंतृत्वेन लीला
वतारस्वरूपेण प्रणिधानमाह ॥ अनन्तेति ॥ द्वितीयश्लोकेन ॥ अवतारो हि ध्यानपूजाद्यर्थमपि शि
वेन स्वीक्रियते ॥ तदुक्तं सुप्रभेदे ॥ यतीनां मंत्रिणां चैव ज्ञानिनां योगिनां तथा ॥ ध्यानपूजानिमि
त्तं हि तनुं गृह्णाति माययेति ॥ अद्भुता विक्रमास्त्रिपुरदहनादयो यस्य तं अम्बिकायाः पार्वत्याः पति
रम्बिकापतिस्तमिति च विजयपरिणयनादयः परमेश्वरस्य लीला दर्शिताः तर्हि प्राकृतपुरुष
वदेव रागद्वेषादिदोषपारतंत्र्यात्संसार्येवासौ तत्राह ॥ ईशानमनीशमिति ॥ संसारिणो हि अ
नीशितृत्वात्सुखदुःखांतरं तत्र तत्त्वाद्व्यवस्थमनीषा नाईशावृतस्य शिवस्तु लीलयैव विजयपरिणयना
दिव्यापारमाचरन्नपि रागद्वेषादिविरही सर्वजगदीशिता च न पुरुषांतरपरतंत्र इति न लौकिक

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

समइत्यर्थः॥ ननु लोकवदेव सर्वेपि व्यवहाराः शिवस्यापि श्रूयंते॥ अत एवांलीलारूपतैव कुत इत्य
त आह॥ अनंतेति॥ अन्तः परिच्छेदस्तद्रहितयोरानंदबोधयोरंबुधिः समुद्रः कालादेरंतकर
श्च तत्कृतपरिच्छेदविरहात्॥ पारमेश्वरयोरानंदज्ञानयोर्नलौकिकानंदज्ञानवदुत्पत्तिविना
शवत्त्वं वस्तुकृतपरिच्छेदविरहाच्च तयोरखंडैकरसत्वं अतिशायिनो वस्त्वंतरस्याभावेन
निरतिशयत्वं चेति॥ कुतो लौकिकव्यवहारसाधारण्याशंकावकाश इत्यर्थः॥ यद्यप्यंपांनि
धिरनंतवान्सातिशयश्च तथापि लौकिकानां समुद्रेनंतवत्वसातिशयत्त्वविरहाभिमानात्तदभि
मतदृष्टांतेनैव परमेश्वरस्याप्यनंतत्त्वं निरतिशयत्वं प्रदर्शयितुमंबुनिधिना रूपकं कृतमिति
ननु लौकिका अपि सर्वात्मकादीश्वरादभिन्ना एवेति कथं तदीयो ज्ञानानंदो न तत्सदृश इति सत्यं
तत्सदृशो अज्ञानेनावृतत्वात्तु तत्सादृश्यं न तेजानंतीति॥ उक्तं हि॥ अज्ञानेनावृतो रामः साक्षान्ना

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

णयत्नोपिच॥स्वस्वरूपंतुनाज्ञासीदिति॥अतस्तिरोहितज्ञानत्वाल्लौकिकानांव्यापाराद्दुःखमया
एवनलीलाः अनावरणपरमानंदज्ञानत्वेनतुपरमेश्वरस्यविजयपरिणयनादिव्यापार
लीलाएवेत्यभिप्रायः॥अत्रनिष्कलशिवस्यतद्रूपतयावस्थानमेवप्रणामः सकल

अनन्तानन्दबोधाम्बुनिधिमद्भुतविक्रमम्॥अम्बिकापतिमीशानमनीशं
प्रणमाम्यहम्॥

स्यतुध्यानस्तुतिपूजात्मकः॥तदुक्तंसुप्रभेदे॥ध्यानपूजाविहीनंयन्निष्कलंतद्धिचिन्तयेत
सत्यचित्सकलंशम्भुंनिष्कलंसंप्रपूजयेदिति॥२॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इत्थं मंगलाचरणं विधाय ऋषिसूतसंवादात्मना पुराणमारभ्यते ॥ सत्रावसान इत्यादिना ॥ ननु व्यासे
न सूताय प्रागेवोपदिष्टान्यष्टादशपुराणानि अधुना तत्पुनर्मुनयः शृण्वन्ति सूतो व्याचष्टे व्यास
स्तु कुरुते मंगलाचरणमित्यसंगतम् ॥ उच्यते व्यासः सूताय पुराणानि प्रागुपदिश्यापि तान्येव
संप्रति मुनिसूतसंवादात्मना निबध्नातीति स्वयं क्रियमाणनिबंधनादौ स्वयमेव मंगलमाचर
तीति किमनुपपन्नम् ॥ अथ सूताय स्वात्मन उपदेशरूपं परित्यज्य व्यासेन मुनिसूतसंवादा
त्मना निबंधने किं प्रयोजनम् ॥ उच्यते ॥ पुराणप्रतिपाद्यायास्तत्त्वविद्यायाः मुनि प्रभावा
तिशयाविष्करणं प्रयोजनम् ॥ तथाहि इत्थं प्रभावेयं विद्या यत्सूतः प्राङ्महान्कनीयानपि व्या
सात्पुराणमुखादेनामधिगम्य मुनीनां स्वयं तत्त्वोपदेशकर्त्ता जात इति तत्र सत्रावसाने विशुद्धहृ
दयाः प्रसन्नेन्द्रियमानसा इति पदत्रयेण मुनीनां परविद्योचिताऽधिकारसंपत्तिनिरूपणं तथाहि ॥ श्रुतिस्तु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्०हि० तीतिहासपुराणप्रतिपादितवेदानुवचनयज्ञदानतपोव्रतादिभिः प्रक्षीणसकलकलुषस्य अत एव शु
५ द्धबुद्धेर्जनितजिज्ञासस्य परशिवस्वरूपविद्यायामधिकारः अत ईदृग्विधाविद्याग्रहणाधिकारैका
रणगुणगणः उचितत्वादवितर्कनीयाः ॥ तत्र सत्रावसान इत्यनेन श्रौतसकलकर्मानुष्ठानस्य
विद्याप्रतिबंधकसकलपापापनयनरूपं विशुद्धहृदयत्वे कारणत्वमुच्यते ॥ चतुर्विधा हि सोम
यागाः एकाहाहीनसत्रायनात्मकाः ॥ एकैकदिनसाध्या अग्निष्टोमादयः एकाहाः ॥ द्विरात्रा
दय एकादशरात्रावसाना अहीनाः ॥ द्वादशाहस्तु सत्राहीनोभयात्मकः ॥ त्रयोदशरात्रादीनि
सत्राणि संवत्सरसाध्यान्ययनानि अयनेष्वपि च सत्रप्रयोगो दृश्यते ॥ गावो वा एतत्सत्रमास
त विश्वसृजः प्रथमासत्रमासतेति तथा नैमिषे निमिषक्षेत्रे ऋषयः शौनकादयः सत्रं स्वर्गायलो
काय सहस्रसममासतेति ॥ तदिह नैमिषीयैः क्रियमाणस्यानेकसंख्यासंवत्सरसाध्यस्यायनत्वे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पिसत्रपदप्रयोगोपपत्तिः सत्रं च परमो धर्म इत्यपरेषामपि महतां वेदानुवचनयागदानतपोव्रतादी
नामुपलक्षणम् तेषामपि हि चित्तशुद्धिद्वारा विविदिषाकारणत्वमिष्यमाणवेदनकारणत्वं च श्रू
यते तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेति ॥ तथा पाशुपतव्र
तस्यापि परशिवसाक्षात्कारकारणत्वमथर्वशिरसि दृश्यते ॥ अग्निरित्यादिना भस्म गृहीत्वा वि

सत्रावसाने मुनयो विशुद्धहृदयाः शुभम् ॥ नैमिषीया महात्मानमागतं रोमहर्षणम् ॥ २

मृज्यांगानि संस्पृशेत् ॥ तस्माद्व्रतमेतत्पाशुपतं पशुपाशविमोक्षायेति ॥ उक्तस्य सत्रपदोपल
क्षितस्य कर्मराशेर्बुद्धिशुद्धौ कारणभावमाह ॥ विशुद्धहृदया इति ॥ हृदयं बुद्धिस्तस्या विशुद्धिर्नो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू॰ हि॰ ६

मसंचितदुरितापचयेनेन तन्निबंधनस्य दुःखस्य निरासः॥ नैमिषीया इति॥ ब्रह्मणा विसृष्टस्य चक्र
स्य नेमिः शीर्यते कुण्ठि भवति यत्र तन्नैमिषं नैमिषमेव नैमिषम्॥ तथा चोक्तं वायवीये॥
एतन्मनोमयं चक्रं मया सृष्टं विसृज्यते॥ यत्रास्य शीर्यते नेमि नैमिषं तच्छुभावहम्॥१
इत्युक्त्वा सूर्यसंकाशं चक्रं सृष्ट्वा मनोमयम्॥ प्रणिपत्य महादेवं विससर्ज पितामहः॥२॥ ते
पि हृष्टतरा विप्राः प्रणम्य जगतां पतिम्॥ प्रययुस्तस्य चक्रस्य यत्र नेमिर्व्यशीर्यत॥३॥ तद्व
नं तेन विख्यातं नैमिषं मुनिपूजितमिति॥ नैमिषमेषां निवास इति नैमिषीयाः॥३॥ त
था प्रसन्नेन्द्रियमानसा इति॥ मनसः प्रसादो नाम रजस्तमोभ्यामनभिभवादावरणविक्षेप
विरहेण तत्त्वप्रणिधाने ऐकाग्र्यमिन्द्रियाणां प्रसादो नाम प्रसन्नता मनः प्रतिकूलपरिहा
रेण प्रस्तुततदानुकूल्येनैव वर्तनं श्रूयते हि॥ यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तस्येन्द्रियाण्यवश्यानिदुष्टाश्वाइवसारथेः ॥ यस्तुविज्ञानवान् भवतिसमनस्कःसदाशुचिः ॥ त
स्येन्द्रियाणिवश्यानिसदश्वाइवसारथेरिति ॥ पतंजलिरप्याह स्वविषयासंप्रयोगेचित्तस्व
रूपानुकारइवेन्द्रियाणांप्रत्याहारइति ॥ इत्थमिहजन्मनिजन्मांतरेवाविहितैर्व्रतदानादि
भिःसंचितदुरितनिरासद्वारारजस्तमोभ्यामनभिभवद्हृदयासत्वजिज्ञासवोविद्याग्रहणा
धिकारिणोदर्शिताः ॥ विद्योपदेशेतुसूत्तस्येदानीमधिकारितामाह ॥ महात्मानमागतमिति
॥ उभयंहितत्रापेक्षितं अनुग्रहसामर्थ्यमनुग्रहशीलत्वंचेति ॥ तत्रमहात्मानमितिमहत्त
पःप्रकर्षादासादितपरशिवसाक्षात्कारनिबंधनमनुग्रहसामर्थ्यमुक्तमागतमिति ॥ वि
शिष्टाधिकारिलाभात्तदुद्धरणार्थमनाहूतस्यापिस्वयमेवागमनात्परमकारुणिकत्वाद
नुग्रहशीलत्वमुक्तं यथाजनकंप्रतियाज्ञवल्क्यस्येति ॥ अथविद्याग्रहणाधिकारसम्प

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

७ सू॰ हि॰ ज्ञामुनयउपदेशोचितगुरुलाभनिबंधनयाप्रीत्यातंपरिपूज्यस्वजिज्ञासामाविष्कृतवंत

दृष्ट्वायथार्हंसम्पूज्यप्रसन्नेन्द्रियमानसाः।। पप्रच्छुःसंहितांपुरायांसूतंपौरा
णिकंमुदा ।। ४ ।।

इत्याह ।। पप्रच्छुरिति ।। उक्तंहि ।। तद्विद्धिप्रणिपातेनपरिप्रश्नेनसेवया ।। उपदेक्ष्यंतितेज्ञा
नंज्ञानिनस्तत्वदर्शिनइति ।। ४ ।।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवं मुनिभिः पृष्टो मुनीनां पुराणसंहिताश्रवणे मुख्याधिकारसिद्ध्यै परशिवप्रणिधानपुरःसरं शिष्यावलोकनरूपां चाक्षुषीं दीक्षामकार्षीदित्याह ॥ एवं पृष्ट इत्यादि ॥ उक्तं ह्यागमेषु चाक्षुषी दीक्षा ॥ चक्षुरुन्मील्य यत्नेन ध्यात्वा शिष्यं समीक्षते ॥ पशुबंधविमोक्षाय दीक्षेयं चाक्षुषी

एवं पृष्टो मुनिश्रेष्ठैः सूतः सर्वार्थदायिनम् ॥ महादेवं महात्मानं ध्यात्वा व्यासं च भक्तितः ॥५॥ समाहितमना भूत्वा विलोक्य मुनिसत्तमान् ॥ वक्तुमारभते सूतः संहितां श्रुतिसम्मताम् ॥६॥

मतेति ॥ यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ॥ तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मन इति ॥ श्वेताश्वतरश्रुतेः परशिवप्रणिधानवत् गुरुप्रणिधानमपि विधेयमित्याह ॥ व्यासं चेति ॥५॥ संहितां श्रुतिसंमितामिति ॥ सकलश्रुत्यर्थसंग्राहिकामित्यर्थः ॥६

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू० हि० विवक्षितायाः अस्याः संहितायाः व्यासमुखादागतत्वेन प्रामाण्यं ख्यापयितुं नानामुनिप्रणीतसकलोपपु
८ राणमूलभूतानामष्टादशानां पुराणानां वेदशाखाविभागस्य च पुराणयनेन व्यासस्य सार्वज्ञत्वम्॥ अत एव

सूत उवाच॥ ब्राह्मं पुराणं प्रथमं द्वितीयं पाद्ममुच्यते॥ तृतीयं वैष्णवं प्रोक्तं चतुर्थं शै
वमुच्यते॥ ७॥ ततो भागवतं प्रोक्तं भविष्याख्यं ततः परम्॥ सप्तमं नारदीयं च मार्क
ण्डेयं तथाष्टमम्॥ ८॥ आग्नेयं नवमं पश्चाद्ब्रह्मवैवर्तमेव च॥ ततो लैङ्गं वाराहं च
ततः स्कान्दमनुत्तमम्॥ ९॥ वामनाख्यं ततः कौर्मं मात्स्यं तत्परमुच्यते॥ गारुडाख्यं त
तः प्रोक्तं ब्रह्माण्डं तत्परं विदुः॥ १०॥

च तस्य माहेश्वरावतारत्वं प्रतिपादयितुमष्टादशपुराणानि अनुक्रामति ब्राह्ममित्यादि॥ ब्रह्मसंबंधि
ब्राह्मं तस्येदमित्यणि नस्तद्धित इति टिलोपस्य अप्रवृत्तिः प्रकृतिभावेन निरासे पि ब्राह्मोजाताविंनादृ

तिन्निपात

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ग्रंथतश्च तुल्लक्षमिति संख्याभिधानं प्रक्षेपविप्लवपरिहाराय॥११॥ कामिककारणादीनामागमसंहि
तानां शिवेनैव प्रणयनात्प्रामाण्ये यथा विश्रंभः॥ एवं नारायणावतारेण व्यासेन प्रणयनात्पुराणेष्व

ग्रंथतश्च तुल्लक्षं पुराणं मुनिपुंगवाः॥ अष्टादशपुराणानां कर्ता सत्यवतीसुतः॥११॥
कामिकादिप्रभेदानां यथा देवो महेश्वरः॥ अष्टादशपुराणानि श्रुत्वा सत्यवतीसुता
त्॥१२॥ अन्यान्युपपुराणानि मुनिभिः कीर्तितानि तु॥ आद्यं सनत्कुमारेण प्रोक्तं वेद

व्यासावविशिष्ट इत्याह॥ अष्टादशपुराणानामिति॥११॥ नानामुनिप्रणीतानामुपपुराणानाम
प्येतन्मूलत्वादेतेषां प्रणेतुर्व्यासस्य सार्वज्ञत्वं किं वक्तव्यमित्याह॥ अष्टादशपुराणानि श्रुत्वेति॥१२
उपपुराणान्यप्यष्टादशानुक्रामति॥ आद्यं सनत्कुमारेण प्रोक्तमित्यादिना॥१३॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू०टि० १४॥१५॥१६॥१७॥१८॥ अथेदानीं विवक्षितां सूतसंहितामवतारयितुमनुक्रान्तानां पुराणानां
८ मध्ये त्रयोदशस्य स्कंदपुराणस्य संहितादिविभागमाह स्कांदमध्याभिवक्ष्यामीति॥१९॥२०॥ सौ

द्वितीयं नारसिंहाख्यं तृतीयं नांदमेव च॥ चतुर्थं शिवधर्माख्यं दौर्वाससं पञ्चमं विदुः॥१४॥ षष्ठं
तु नारदीयाख्यं कापिलं सप्तमं विदुः॥ अष्टमं मानवं प्रोक्तं ततश्चोशनसेरितम्॥१५॥ ततो ब्रह्मा
ण्डसंज्ञं तु वारुणाख्यं ततः परम्॥ ततः कालीपुराणाख्यं विशिष्टं मुनिपुङ्गवाः॥१६॥ ततो
वाशिष्ठलैङ्गाख्यं प्रोक्तं माहेश्वरं परम्॥ ततः साम्बपुराणाख्यं ततः सौरं महाद्भुतम्॥१७॥ प
राशरं ततः प्रोक्तं मारीचाख्यं ततः परम्॥ भार्गवाख्यं ततः प्रोक्तं सर्वधर्मार्थसाधकम्॥१८॥ स्कां
दं तु ग्रंथसंख्याभिः सर्वविज्ञानसागरम्॥ स्कांदमध्याभिवक्ष्यामि पुराणां श्रुतिसम्मितम्॥१९

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रांत्येति॥ सूरसंबंधि सौरं तदस्यामस्तीति सौरः अर्शआदिभ्योजित्यजं तं मत्वर्थीयाद्दाप्॥ सूरस्येयं संहितेति

षड्विधं संहिताभेदैः पञ्चाशत्खण्डमण्डितम्॥ आद्या सनत्कुमारोक्ता द्वितीया सूतसंहि
ता॥२०॥ तृतीया शांकरी विप्राश्चतुर्थी वैष्णवी मता॥ तत्परा संहिता ब्राह्मी सौरांत्या
संहिता मता॥२१॥ ग्रंथतश्चैव षड्विंशत्सहस्रैरुपलक्षिता॥ आद्या तु संहिता विप्रा
द्वितीया षट्सहस्रिका॥२२॥ तृतीया ग्रंथतस्त्रिंशत्सहस्रैरुपलक्षिता॥ तुरीया संहि
ता पञ्चसहस्रैरगाभिनिर्मिता॥२३॥ ततोन्या त्रिसहस्रैर्ग्रंथेनैव विनिर्मिता॥ अ
न्या सहस्रतः स्वच्छा ग्रंथतः परिडतान्नमाः॥२४॥ द्वितीयां संहितां वक्ष्ये सर्वपाप
प्रणाशिनीम्॥ मुनिभिर्देवगंधर्वैः पूजितामतिशोभनाम्॥२५॥
तुल्युत्पन्नो तस्येदमित्यरांतां डीपा भवितव्यमिति॥२१॥२२॥२३॥२४॥ इत्थं विभागमभिधाय
विवक्षितां संहितां सूतः श्रुति जानी ते॥ द्वितीयां संहितां वक्ष्य इति॥२५

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू०सं० यद्यपिखण्डान्तरेष्वपिशिवमाहात्म्यमुच्यते॥ तथापिप्रथमस्यतत्प्राधान्येनव्यपदेशः॥२६॥द्विती
१० योज्ञानयोगाख्यइति॥ज्ञानस्ययोगाउपायाः यमनियमादयोज्ञानयोगाः आख्यायंतेऽस्मिन्नित्याख्यः
आख्यातोपसर्गेइतिकप्रत्ययः॥ज्ञानयोगानामाख्यइति॥संबंधसामान्यषष्ठ्याः समासस्तु

चतुर्धाखण्डितासापिपवित्रावेदसंमिता॥शिवमाहात्म्यखण्डाख्यःप्रथमःपरि
कीर्तितः॥२६॥द्वितीयोज्ञानयोगाख्यःसर्ववेदान्तसंग्रहः॥तृतीयोमुक्तिख
ण्डाख्यश्चतुर्थोयज्ञवैभवः॥२७॥

प्रकृतेसंबंधविशेषेकर्मत्वेयोग्यताबलात्षष्ठ्येवास्यतिनचकर्मणिषष्ठ्याएवसमासःकिंनस्या
दितिवक्तव्यंकर्मण्यणीत्यनेनपरेणाबाधापातादिति॥यज्ञवैभवखण्डेतुयज्ञायज्ञविशेषावक्ष्य
न्तेतेसर्वेज्ञानात्मकाएवयज्ञाः॥इहतुतदुपायायमनियमादयइत्यसंकरः॥यज्ञवैभवइति॥यज्ञानां
वैभवःप्रभावोऽस्मिन्नितियज्ञवैभवः॥२७॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आद्यः सप्तशतमिति॥ सप्तानां शतानां समाहारः सप्तशतमिति॥ समाहारे द्विगुः॥ अकारांतत्वेन प्रा
प्तं स्त्रीलिङ्गत्वं पात्राद्यदिभ्यः प्रतिषेध इत्यनेन निषिध्यते॥ नन्वेकोयं खंडः कथं सप्तशतसमा
२१ हारात्मकः अत उक्तम् ग्रंथत इति॥ ग्रंथपद्यारास्वावयवभूतानां ग्रंथानां सप्तशतसमाहारात्म

आद्यः सप्तशतं प्रोक्तं ग्रंथतः पण्डितोत्तमाः॥ द्वितीयो ग्रंथतः सप्तशतं त्रिंशत्ततोधिक
म्॥२८॥ ततोधिकं च सप्तैव मुनयः परिकीर्त्तिताः॥ तृतीयः षट्शतं विप्राः सप्तत्रिंशद्वि
वर्जितः॥२९॥

कत्वात्तद्भेदेन स्वयमपि सप्तशतमित्यर्थः॥ ततोऽधिकमिति॥ अधिकं च किंचिदस्तीति सा
मान्येनोपक्रम्य कियत्तदिति जिज्ञासायां त्रिंशदिति॥ शाक्यमंजलिभिः पांतु वाताः केतकगंधिन
इति वत्॥२८॥२९॥०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सं॰हि॰ चतुर्थे इति॥ चतुर्थे खण्डे तु प[illegible]दिति त्रिकाकांश्चिं[illegible]दिति। [illegible]उपरिभाग अधोभाग
२१ इति भेदेन द्विप्रकारः॥३०॥ प्रकृतसंहितागतखण्डचतुष्टयस्याध्यायविभागमाह॥ आद्यस्त्रयोद
शाध्याया इति॥ आद्यः खण्डोऽध्यायैस्त्रयोदशभिर्युतः सप्तशतमिति वरः॥ ननु त्रयोदशभिरध्यायैरि

चतुर्थस्तु मुनिश्रेष्ठाः सहस्राणां चतुष्टयम्॥ उपर्यधोभागभेदाद्द्विधाभूतः स उच्यते॥३०

ति दिक्संख्ये संज्ञायामित्युक्तत्वात्॥ इह च द्विगुसमासनिमित्तानां संज्ञादीनामभावात् आद्यस्त्रयोदशा
ध्याय इति तु पाठः श्रेयान् न च हि त्रयोदशेति पदच्छेदः तत्र प्रथमे खण्डे प्रथमेऽध्याये ग्रंथावतारः
॥ द्वितीये पाशुपतव्रतम्॥ तृतीये नंदीश्वरविष्णुसंवादेन ईश्वरप्रतिपादनम्॥ चतुर्थे ईश्वरपूजा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विधानम्॥ देवपूजाफलंचपञ्चमे॥ शक्तिपूजाविधिःषष्ठे॥ शिवभक्तपूजासप्तमे॥ मुक्तिसाधनं
अष्टमे॥ कालपरिमाणतदनवच्छिन्नस्वरूपकथनंनवमे॥ पचिब्रह्मुद्धरणंदशमे॥ ब्रह्मणस्सृष्टि
कथनंएकादशे॥ हिरण्यगर्भादिविशेषसृष्टिः द्वादशे॥ जातिनिर्णयः त्रयोदशे॥ तीर्थमाहा
त्म्यं द्वितीयखण्डे विंशतिरध्यायाः॥ तत्रप्रथमेध्याये ज्ञानयोगसंप्रदायपरंपरा॥ द्वितीये
आत्मनासृष्टिः॥ तृतीयेब्रह्मचर्याश्रमविधिः॥ चतुर्थेगृहस्थाश्रमविधिः॥ पञ्चमेवानप्रस्था
श्रमविधिः॥ षष्ठेसंन्यासविधिः॥ सप्तमेप्रायश्चित्तम्॥ अष्टमेदानधर्मफलम्॥ नव
मेपापकर्मफलम्॥ दशमेपिण्डोत्पत्तिः॥ एकादशेनाडीचक्रम्॥ द्वादशेनाडीशु
द्धिः॥ त्रयोदशेअष्टाङ्गयोगेयमविधिः॥ चतुर्दशेनियमविधिः॥ पञ्चदशेआसनविधानम्॥
षोडशेप्राणायामविधिः॥ सप्तदशेप्रत्याहारविधानम्॥ अष्टादशेधारणाविधिः॥ एकोनविंशे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्०हि० ध्यानविधिः॥ विंशे समाधिः॥२०॥ तृतीये मुक्तिखण्डे नवाऽध्यायः॥ तत्र प्रथमे मुक्तिमुक्त्युपायमो
१२ चकमोचकप्रदचतुर्विधप्रश्नः॥ द्वितीये मुक्तिभेदकथनम्॥ तृतीये मुक्त्युपायकथनम्॥ चतु
र्थे मोचककथनम्॥ पञ्चमे मोचकप्रदकथनम्॥ षष्ठे ज्ञानानुत्पत्तिकथनम्॥ सप्तमे गुरूपस

आद्यस्त्रयोदशाऽध्यायो द्वितीयो विंशतिस्तथा॥ तृतीयो नव विप्रेन्द्राश्चतुर्थस्तु तथैव
च॥२१॥

दनशुश्रूषणामहिमा॥ अष्टमे व्याघ्रपुरे देवानामुपदेशः॥ नवमे ईश्वरनृत्यदर्शनम्॥ चतुर्थे
खण्डे सप्तषष्टिरध्यायः॥ तत्र पूर्वभागे सप्तचत्वारिंशत्॥ तत्र प्रथमे ध्याये सर्ववेदार्थप्रश्नः॥
द्वितीये परापरवेदार्थविचारः॥ तृतीये कर्मयज्ञवैभवम्॥ चतुर्थे वाचिकयज्ञः॥ पञ्चमे प्रणववि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चारः॥ षष्ठे गायत्रीप्रपञ्चः॥ सप्तमे ऽष्टात्ममंत्रः॥ ऽष्टमे षडक्षरविचारः॥ नवमे ध्यानय
ज्ञः॥ दशमे ज्ञानयज्ञः॥ एकादशादिपञ्चस्व ध्यायेषु ज्ञानयज्ञविशेषाः॥ षोडशे ज्ञानोत्पत्ति
कारणम्॥ सप्तदशे वैराग्यविचारः॥ ऽष्टादशे ऽप्युनित्यवस्तुविचारः॥ एकोनविंशे नित्यवस्तु
विचारः॥ विंशे विशिष्टधर्मविचारः॥ एकविंशे मुक्तिसाधनविचारः॥ द्वाविंशे मार्गप्रामा
ण्यम्॥ त्रयोविंशे शंकरप्रसादः॥ चतुर्विंशपञ्चविंशयोः प्रसादवैभवम्॥ षड्विंशे शिव
भक्तिविचारः॥ सप्तविंशे परपदस्वरूपविचारः॥ ऽष्टाविंशे शिवलिंगस्वरूपकथनम्॥
एकोनत्रिंशे शिवस्थानविचारः॥ त्रिंशे भस्मधारणवैभवम्॥ एकत्रिंशे शिवप्रीतिकरंजी
वब्रह्मैक्यविज्ञानम्॥ द्वात्रिंशे भक्त्यभावकारणम्॥ त्रयस्त्रिंशे परतत्त्वनामविचारः॥ चतु
स्त्रिंशे महादेवप्रसादकारणम्॥ पञ्चत्रिंशे संप्र दाय परंपराविचारः॥ षट्त्रिंशे स्पष्टोमुक्ति

CC-0: Jangamwadi Math Collection. Digitized by eGangotri

सू॰ हिं॰ करक्षेत्रमहिमा॥ सप्तत्रिंशे मृत्युपायविचारः॥ अष्टत्रिंशे मुक्तिसाधनविचारः॥ एकोनचत्वारिंशे
१३ वेदानामविरोधः॥ चत्वारिंशे सर्वसिद्धिकरकर्मविचारः॥ एकचत्वारिंशे पातकविचारः॥ द्वि
चत्वारिंशे प्रायश्चित्तविचारः॥ त्रिचत्वारिंशे पापमुक्त्युपायः॥ चतुश्च त्वारिंशे द्रव्यमुक्त्युपा
यविचारः॥ पञ्चचत्वारिंशे अभक्ष्यनिवृत्तिः॥ षट्चत्वारिंशे मन्त्रसूचकम्॥ सप्तचत्वा
रिंशे अवशिष्टपापस्वरूपकथनम्॥ ४७॥ चतुर्थखण्डस्योत्तरभागे विंशतिरध्यायाः
२०॥ तत्र प्रथमे ब्रह्मगीतिः॥ द्वितीये वेदार्थविचारः॥ तृतीये साक्षिशिवस्वरूपकथन
म्॥ चतुर्थे साक्ष्यस्तित्वकथनम्॥ पञ्चमे आदेशकथनम्॥ षष्ठे दहरोपासनम्॥ सप्त
मे वस्तुस्वरूपविचारः॥ अष्टमे तत्त्ववेदनविधिः॥ नवमे आनन्दस्वरूपकथनम्॥ दशमे
आत्मनो ब्रह्मत्वप्रतिपादनम्॥ एकादशे ब्रह्मणः सर्वशरीरस्थितिः॥ द्वादशे शिवस्यात्म

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हंबन्धप्रयोजनकथनम्॥त्रयोदशेसूतगीतिः॥चतुर्दशेआत्मनास्तुतिः॥पञ्चदशेसामान्यस्तुतिः
॥षोडशेविशेषस्तुतिः॥सप्तदशेआत्मस्वरूपकथनम्॥अष्टादशेसर्वशास्त्रार्थसंग्र

सप्तषष्टिःसमस्तानांवेदानामर्थेआस्तिकाः॥अस्यामेवस्थितःसाक्षात्सं
हितायांनसंशयः॥३२॥

हः॥एकोनविंशेरहस्यविचारः॥विंशेसर्ववेदान्तसंग्रहः॥इतिसामान्येनाऽध्यायार्थोः
कथिताः॥३१॥सकलश्रुत्यर्थसंग्रहात्मकत्वादस्यांसंहितायामवश्यमादरोविधेयइत्या
ह॥समस्तानामितिश्लोकशेषेण॥३२॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू०हि० नानाविधोपाख्यानप्रतिपादनपर्यवसिते पुराणे कः प्रसंगो वेदार्थस्य तत्राह ॥ सर्गश्चेत्येकेन ॥
२४ ब्रह्माण्डस्य लक्षणत्वेन सृष्टिस्थितिप्रलयाख्य एव वेदे प्रधानं प्रमेयम् ॥ आत्मैवेदमग्र आसी
त् स ऐक्षतेति महासर्गः ॥ नेह नानास्तीति महाप्रलयः ॥ अन्यत्तु सर्वं स्थित्यवस्थाविलासः ॥ ३

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ॥ वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ॥ ३३
यश्चतुर्वेदविद्विप्रः पुराणं वेत्ति नार्थतः ॥ तं दृष्ट्वा भयमाप्नोति वेदो मां प्रतरिष्यति ॥ ३४

स्यमेव पुराणेपि वंशमन्वन्तरवंशानुचरितानि स्थित्यवस्था एवेति ॥ ३३ ॥ वेदार्थ एव चेत्पुराणे सवेदे
नैव सिद्धः किं पुराणेनेति तत्राह ॥ यश्चतुर्वेदविद्विप्र इति ॥ तत्र स्थितस्याप्यर्थस्य तावत्तेव दुर
ग धिगमत्वादुपबृंहणाय पुराणमित्यर्थः ॥ अनुपबृंहणे बाधमाह ॥ तं दृष्ट्वेति ॥ विप्लवस्य दुष्परिहा
रत्वं दर्शयितुं वेदे भयारोपः प्रतरिष्यतीति ॥ विप्लावयिष्यतीति विभेति अतस्तमुपबृंहयेदित्यन्वयः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सर्वेषां पुराणादिकमपेक्षितं चेत्तेनैव पर्याप्तं किं वेदैः॥ न वेदानां स्वतःप्रामाण्यात्तन्मूलतयैव पु
राणादेः स्वरूपलाभादित्याह॥ वेदाः प्रमाणं प्रथममिति॥३४॥ अन्यान्यपि॥ अत्रार्थे स्मृतिः

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्॥ वेदाः प्रमाणं प्रथमं स्वतएव ततः पर
म्॥३५॥ स्मृतयश्च पुराणानि भारतं मुनिपुङ्गवाः॥ अन्यान्यपि मुनिश्रे
ष्ठाः शास्त्राणि सुबहूनि च॥३६॥

पुराणमूलानि तदर्थसंग्रहशास्त्राणीत्यर्थः॥३६॥ वेदाविरोधेन॥ विरोधे त्वनपेक्षं स्यादसति
ह्यनुमानमिति हि जैमिनीयं सूत्रम्॥ मूलभूतवेदानुमानेन स्मृत्यादेः प्रामाण्यं तद्विरोधे त्वनु
मानमेव नोदेतीति मूलाभावादुपेक्षणीयम्॥ अथवा यावन्मूलोपलंभनं प्रत्यक्षश्रुतिविरु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्मृ॰ हि॰ ध्वस्तस्यायर्थो नानुष्ठेय इति सूत्रार्थः ॥ वेदाविरोधेन चेत्प्रामाण्यं तर्हि ऋग्वेदेऽनुदितहोमं निं
२५ दित्वा उदितहोमो विधीयते ॥ प्रातः प्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्रं दिवाकीर्त्य
मदिवाकीर्त्यं तः सूर्यो ज्योतिर्न तदा ज्योतिरेषामिति यजुर्वेदे तु उदितहोमनिंदयाऽनुदि
तहोमो विधीयते ॥ यथाऽतिथये प्रद्रुताय शून्यायावसथायाहार्यं हरंति तादृगेव तत् ॥ य

सर्वमवेदाविरोधेन प्रमाणं नास्य वर्त्मना ॥ एक एव द्विजा वेदा वेदार्थश्चैक एव तु ॥ ३७

दुदिते जुहोतीति ॥ अतः परस्परविरोधाद्वेदद्वयमप्रमाणं स्यादित्यत आह ॥ एक एव द्विजा
वेद इति ॥ सर्वोयमेक एव वेदस्तत्कुतः परस्परविरोधः ॥ न चैवं स्ववचनव्याघातः षोडशि
ग्रहणाग्रहणवचनवद्विकल्पाभिप्रायत्वादित्यर्थः ॥ ३७

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कथं तर्हि भेदव्यवहारः ॥ अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तर इति स्मृतिः ॥ वेदा वा एते अनंता वै वेदा इति च श्रुतिरित्यत आह ॥ तथापीति ॥ एकस्याप्यपरिमितस्य वेदस्य केनचिदप्येकेन रूपेण ग्रहीतुं तदर्थस्य चानुष्ठातुमशक्यत्वादेकं वेदमृग्यजुःसामाथर्वभेदेन चतुर्धा विभज्य तत्रैकैकः पुनः सैतिरेयादिशाखाभेदेन भेदित इत्यर्थः ॥ ३५ ॥ ननु वेदशाखा एवं चेदसं

तथापि मुनिशार्दूलाः शाखाभेदेन भेदिताः ॥ अनंता वै द्विजा वेदा वेदार्थोऽपि द्विजोत्तमाः ॥ ३५ ॥ अनन्तो वेदवेद्यस्य शंकरस्य शिवस्य तु ॥ मायया न स्वरूपेण द्विजा हा देव वै भवम् ॥ ३६ ॥

ख्याताः कथं तर्ह्येक एव रुद्रो न द्वितीयोऽवतस्थ इति तैत्तिरीयकश्रुतिः ॥ अहमेकः प्रथममासं वर्त्तामि च भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्त इत्यथर्वशिरसि वचनमित्यत आह ॥ वेदवेद्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू॰ हि॰ स्येति॥ माययान स्वरूपेणेति परमार्थतो ह्यद्वितीयो रुद्र इत्युक्तम्॥ अतस्तेनैव लीलया निर्मि
२६ तस्य मायामयस्य न वास्तवेन तद्द्वैतेन विरोध इत्यर्थः॥ नन्वेतादृशी लीला क्वचिदपि लो
के न दृष्टचरीत्यत आह॥ द्विजा हा देव वैभवमिति॥ हेत्यद्भुते॥ अहहेत्यद्भुते खेद इत्यभिधानं
अन्यत्रादृष्टत्वमद्भुतस्यालंकारेन दूषणमित्यर्थः॥ ३७॥ नन्वपौरुषेया वेदाः॥ वाचा विरू
पनित्यया अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवेति ह्यस्ति श्रुतिः स्मृतिश्चातः ते क
थं निर्मिताः कश्चैता एतावतीं ग्रहीष्यति यस्य कृते निर्मायेरन्नित्यत आह॥ ब्रह्माणं मुनयः
पूर्वमिति॥ स्वयमेव लीलया सकलवेदग्रहणसमर्थं ब्रह्माणं निर्माय स्वात्मनि नित्यमव
स्थिता एव वेदास्तस्मै दत्ता इत्यर्थः॥ न च नित्यसिद्धवेदसमर्पणे शिवस्योपाध्यायतुल्यता
उपाध्यायो हि स्वयमन्यतो लब्ध्वा शिष्यान्॥ अध्यापयति शिवस्तु नैवमन्यतो धीते स्वा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्मनि नित्यमवस्थितानामेव तेषां ब्रह्मद्वारा संप्रदायं प्रवर्त्तयति ॥ यो ब्रह्माणं विदधाति पूर्वं
यो वै वेदांश्च प्रहिणोति तस्मा इति स्थितानामेव वेदानां प्रापणश्रुतेः स्मृतिपुराणादीनामपि
॥४०॥ तर्हि शिवेनैव प्रापणं चेद्वेदसाम्यं न चेदप्रामाण्यं तत्राह ॥ ब्रह्मा सर्वजगत्कर्त्तेति ॥ वे

ब्रह्माणं मुनयः पूर्वं सृष्ट्वा तस्मै महेश्वरः ॥ दत्तवानखिलान्वेदानात्मन्येवस्थि
तानिमान् ॥४०॥ ब्रह्मा सर्वजगत्कर्त्ता शिवस्य परमात्मनः ॥ प्रसादादेव रुद्रस्य
स्मृतीः सस्मार सुव्रताः ॥४१॥

देहि द्वौ भागौ कर्मभागो ज्ञानभागश्चेति ॥ तत्राद्यस्याद्यैः स्मृतिमुखेन ब्रह्मणा शिवाज्ञयैव
व्याख्यातः ॥ द्वितीयस्य तु विष्णुना व्यासरूपेणावतीर्य पुराणमुखेनेति स्मृतिपुराणानां

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्मृ० टि० वेदमूलतानस्वातंत्र्यमित्यर्थः॥
२७

CC-0. Jangamwadi Math Collection. Digitized by eGangotri